# rakArAdi shrI rAmAShTottarashatanAmastotram

# રકારાદિ શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : rakArAdi rAmAShTottarashatanAmastotram

File name : rakArAdirAma108nAmastotram.itx

Category : aShTottarashatanAma, vishhnu, dashAvatAra, paNDita-bellaMkoNDa-rAmarAya-kavIndra, vishnu

Location : doc_vishhnu

Author : paNDita shrI bellaMkoNDa rAmarAya kavIndra

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Source : shrI dashAvatArAShTottara shatanAmAvaliH savyAkhyA

Latest update : January 24, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# રકારાદિ શ્રીરામાષ્ટોત્તરશતનામસ્તોત્રમ્

શ્રી હયગ્રીવાય નમઃ ।

હરિઃ ૐ

રામો રાજીવપત્રાક્ષો રાકાચન્દ્રનિભાનનઃ ।
રાત્રિઞ્ચરાર્દિતક્ષોણી પરિતાપવિનાશનઃ ॥ ૧॥

રાજીવનાભો રાજેન્દ્રો રાજીવાસનસંસ્તુતઃ ।
રાજરાજાદિદિક્પાલમૌલિ માણિક્યદીપિતઃ ॥ ૨॥

રાઘવાન્વયપાથોધિચન્દ્રો રાકેન્દુસદ્યશાઃ ।
રામચન્દ્રો રાઘવેન્દ્રો રાજીવરુચિરાનનઃ ॥ ૩॥

રાજાનુજામન્દિરોરા રાજીવવિલસત્પદઃ ।
રાજીવહસ્તો રાજીવપ્રિયવંશકૃતોદયઃ ॥ ૪॥

રાત્રિનવ્યામ્બુભૃન્મૂર્તી રાજાંશુરુચિરસ્મિતઃ ।
રાજીવહારો રાજીવધારી રાજીવજાપ્રિયઃ ॥ ૫॥

રાઘવોત્સઙ્ગવિદ્યોતો રાકેન્દ્વયુતભાસ્વરઃ ।
રાજલેખાનખાઙ્કૂરો રાજીવપ્રિયભૂષણઃ ॥ ૬॥

રાજરાજન્મણીભૂષો રારાજદ્ભ્રમરાલકઃ ।
રાજલેખાભસીમન્તો રાજન્મૃગમદાઙ્કનઃ ॥ ૭॥

રાજહીરલસચ્છ્રોત્રો રાજીવકરગામૃતઃ ।
રત્નકાઞ્ચીધરો રમ્યો રત્નકાઞ્ચનકઙ્કણઃ ॥ ૮॥

રણત્કાઞ્ચનમઞ્જીરો રઞ્જિતાખિલભૂતલઃ ।
રારાજત્કુન્દરદનો રમ્યકણ્ઠો રતવ્રજઃ ॥ ૯॥

રઞ્જિતાદ્ભુતગાધેયો રાત્રિઞ્ચરસતીહરઃ ।
રાત્રિઞ્ચરભયત્રાતગાધેય સવનોત્તમઃ ॥ ૧૦॥

રારાજચ્ચરણામ્ભોજરજઃપૂતમુનિપ્રિયઃ ।
રાજરાજસુહૃચ્ચાપભેદનો રાજપૂજિતઃ ॥ ૧૧॥

રમારામાકરામ્ભોજ માલોન્મીલિતકણ્ઠમઃ ।
રમાકરાબ્જમારન્દબિન્દુમુક્તાફલાવૃતઃ ॥ ૧૨॥

રત્નકઙ્કણનિધ્વાનમિષલ્લક્ષ્મીસ્તુતિશ્રુતિઃ ।
રમાવામદૃગન્તાલિ વ્યાપ્તદુર્લક્ષ્યવિગ્રહઃ ॥ ૧૩॥

રામતેજસ્સમાહર્તા રામસોપાનભઞ્જનઃ ।
રાઘવાજ્ઞાકૃતારણ્યવાસો રામાનુજાર્ચિતઃ ॥ ૧૪॥

રક્તકઞ્જાતચરણો રમ્યવલ્કલવેષ્ટિતઃ ।
રાત્ર્યમ્બુદજટાભારો રમ્યાઙ્ગશ્રીવિભૂષણઃ ॥ ૧૫॥

રણચ્ચાપગુણોરક્તમુનિત્રાણપરાયણઃ ।
રાત્રિઞ્ચરગણપ્રાણહર્તા રમ્યફલાદનઃ ॥ ૧૬॥

રાત્રિઞ્ચરેન્દ્રભગિનીકર્ણનાસોષ્ટભેદનઃ ।
રાતમાયામૃગપ્રાણો રાવણાહૃતસત્પ્રિયઃ ॥ ૧૭॥

રાજીવબન્ધુપુત્રાપ્તો રાજદેવસુતાર્ધનઃ ।
રક્તશ્રીહનુમદ્વાહો રત્નાકરનિબન્ધનઃ ॥ ૧૮॥

રુદ્ધરાત્રિઞ્ચરાવાસો રાવણાદિવિમર્દનઃ ।
રામાસમાલિઙ્ગિતાઙ્ગો રાવણાનુજપૂજિતઃ ॥ ૧૯॥

રત્નસિંહાસનાસીનો રાજ્યપટ્ટાભિષેચનઃ ।
રાજનક્ષત્રવલયવૃત રાકેન્દુસુન્દરઃ ॥ ૨૦॥

રાકેન્દુમણ્ડલચ્છત્રો રાજાંશૂત્કરચામરઃ ।
રાજર્ષિગણસંવીતો રઞ્જિતપ્લવગાધિપઃ ॥ ૨૧॥

રમાદૃઙ્માલિકાનીલા નીરાજિતપદામ્બુજઃ ।
રામતત્ત્વપ્રવચનો રાજરાજસખોદયઃ ॥ ૨૨॥

રાજબિમ્બાનનાગાનનર્તનામોદિતાન્તરઃ ।
રાજ્યલક્ષ્મીપરીરમ્ભસમ્ભૃતાદ્ભુતકણ્ટકઃ ॥ ૨૩॥

રામાયણકથામાલાનાયકો રાષ્ટ્રશોભનઃ ।
રાજમાલામૌલિમાલામકરન્દપ્લુતાઙ્ઘ્રિકઃ ॥ ૨૪॥

રાજતાદ્રિમહાધીરો રાદ્ધદેવગુરુદ્વિજઃ ।
રાદ્ધભક્તાશયારામો રમિતાખિલદૈવતઃ ॥ ૨૫॥

રાગી રાગવિહીનાત્મભક્તપ્રાપ્યો રસાત્મકઃ ।
રસપ્રદો રસાસ્વાદો રસાધીશો રસાતિગઃ ॥ ૨૬॥

રસનાપાવનાભિખ્યો રામનામામૃતોદધિઃ ।
રાજરાજીવમિત્રાક્ષો રાજીવભવકારણમ્ ॥ ૨૭॥

રમારામાશયાનન્દ દુગ્ધસાગરચન્દ્રમાઃ ।
રામભદ્રો રાજમાનો રાજીવપ્રિયબિમ્બગઃ ॥ ૨૮॥

રમારામાભુજલતા કણ્ઠાલિઙ્ગનમઙ્ગલઃ ।
રામસૂરિહૃદમ્ભોધિવૃત્તિવીચીવિહારવાન્ ॥ ૨૯॥

॥ ઇતિ વિશ્વાવસુ ચૈત્રશુદ્ધ નવમી દિને રામેણ લિખિતં
સમર્પિતં ચ રામભદ્રાય સદ્વિજયતે તરામ્
રકારાદિ શ્રી રામનામાષ્ટોત્તરશતમ્ ॥

Encoded and proofread by Malleswara Rao Yellapragada
malleswararaoy at yahoo.com

Source Book:
shrI dashAvatArAShTottarashatanAmAvaliH savyAkhyA
language: Telugu
Composed by : paNDita shrI bellaMkoNDa rAmarAya kavIndra

*rakArAdi shrI rAmAShTottarashatanAmastotram*
pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*